# Session 2020-21

# प्रश्न पत्र प्रारूप एवं रूप रेखा

## कक्षा - नौवीं

## विषय - संस्कृतम्

**समयम् : होरात्रयम्** **पूर्णांक : 85**

**खण्ड क ( अपठित-अवबोधनम् )**

1. अधोलिखितम् अनुच्छेदं अधिकृत्य निर्देशित प्रश्नानामुतराणि दीयन्ताम्।

परेषाम् उपकार: परोपकार: वर्तते। परोपकार: एक महान् गुण: अस्ति। परोपकार भावना अस्यां प्रकृतौ सर्वत्र वर्तते। वृक्षा: स्वयं फलं न खादन्ति। नद्य: परोपकारार्थमेव वहन्ति। गाव: स्वयं दुग्धं न पिबन्ति। सर्वं जगत् परोपकारार्थं वर्तते। महापुरुषा: स्वार्थं विहाय सर्वप्राणिभ्य: कार्यं कुर्वन्ति। महाराज: शिवि: कपोतरक्षार्थं स्वकीयं मांसं श्येनाय प्रददौ। महार्षि: दधीचि: देवहिताय स्वबलिदानं कृतवान्। वस्तुत: परोपकार: पुण्याय पापाय परपीडनम्।

(1) एकपदेन उत्तरत–

(क) परोपकारभावना कुत्र वर्तते?

(ख) नद्य: किमर्थं वहन्ति?

(2) पूर्णवाक्येन उत्तरत–

(क) महापुरुषा: कथं कार्यं कुर्वन्ति।

(3) निर्देशानुसारम् उत्तरत–

(क) 'स्वकीयम' पदस्य विलोम पदं लिखत्?

(ख) 'खादन्ति' अस्य क्रियापदस्य किं क्रियापदम्? 5

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित प्रश्नानाम् उत्तराणि दीयन्ताम्।



Downloaded from cclchapter.com

कस्मिंश्चित् नगरे स्वभावेन कृपणः कश्चन ब्राह्मणः प्रतिवसूति स्म। तेन भिक्षाऽर्जितः सक्तुभिर्भुक्त शेषैः कलशः सम्पूरितः। तं चं घटं नागदन्तेऽवलम्ब्य, तस्याऽधस्तात् खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति। अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास ''यत् परिणूर्णोऽयं घटस्तावत् सक्तुभिः वर्तते। तद् यदि दुर्भिक्षं भवति तदनेन रूप्यकाणां शतमुत्पत्स्यते।''

(1) एकापदेन उत्तरत-

(क) ब्राह्मणस्य स्वभावः कीदृशः आसीत्?

(ख) ब्रह्मणः कुत्र प्रतिवसति स्म?

(2) पूर्ण वाक्येन उत्तरत-

(क) केन भिक्षाऽर्जितः सक्तुभिः भुक्तशेषैः कलशः संपूरितः?

(3) निर्देशानुसारम् उत्तरत-

(क) उपर्युक्त गद्यांशस्य तृतीयांशरूपेण सारं लिख्यन्ताम्?

(ख) प्रदत्तगद्यांशस्य शीर्षकं विधीयताम्? 7

**खण्ड-ख ( रचनात्मकं कार्यम् )**

3. मञ्जूषातः पदानि विचित्य प्रार्थना पत्रे रिक्तस्थानानि पूरयन्तु।

(पित्रोः, त्वम्, संस्कृत-विषये, छात्रावासतः, अनुजः, आशीषः, सिध्यन्ति, शोभनः, तव, प्राप्ताः

................(1)

प्रिय............. (2) रमेशः

सस्नेहम्.............(3)

ह्यः ............. (4) पत्रं प्राप्तवान्। परीक्षापरिणाम्ः............(5) अस्ति, परं.........(6) भवतान्यूना अंकाः ............. (7) इति सखेंद मया अधीतम्।.................(8) प्रतिदिनं प्रातः काले उत्थाय संस्कृतस्य अभ्यासं



Downloaded from cclchapter.com

कुरू, संस्कृत अध्यापकं च पुनः-पुनः प्रश्नान प्रच्छ। अभ्यासेन एव सर्वाणि कार्याणि ............ (9)। ........... (10) चरणयोः सादरं प्रणामः।

भवतः अग्रजः

रामः। 5

4. मञ्जूषामधिकृत्य अधोलिखितं सम्वादं पूर्यन्ताम्।

(तुलसीत्, गृहे, श्रेष्ठिनो, कृत्वा, भ्रान्त्वा, प्रस्थितः, नास्ति, निक्षेपतुला, श्रेष्ठिनमुवाच, यदि)

तस्य च ......... लोहघटिता पूर्वपुरुषोपार्जिता ..........। तां च कस्यचित ......... गृहे निक्षेपभूतां .......... देशान्तरं ..........। ततः सुचिरं कालं देशान्तरं यथेच्छया .......... पुनः स्वपुरमागत्य तं .......... "भो श्रेष्ठिन्! दीयतां मे सा ..........।" स आह "भोः। ..........सा, त्वदीया तुला मूषकैर्भक्षिता" इति। जीर्णधन आह .........."भोः श्रेष्ठिन्! नास्ति दोषस्ते ......... मूषकैः भक्षितेति।" 5

5. अधोलिखित विषयेषु एकं विषयम् अधिकृत्य सप्त वाक्यानि लिखत।

(1) मम् मित्रम्

(2) मम विद्यालयः

(3) पर्यावरणम् 7

**खण्ड - ग ( अनुप्रयुक्त व्याकरणम् )**

6. अधोलिखित पदेषु सन्धिं अथवा विच्छेदं कुरूत। (कोई 6 करें)

(क) देवालयः = ............. + ............ ।

(ख) रवीन्द्रः = ............. + ............ ।

(ग) महा+ईशः = ............. ।

(घ) यद्यपि = ............. + ............ ।

(ङ) चापि = ............. + ............ ।



Downloaded from cclchapter.com

(च) प्रति + एकम् = ............. ।

(छ) सु + आगतम् = ............ ।

(ज) नायकः = ............. + ............ । 3

7. निम्नलिखित वर्णानां समुचितम् उच्चारण-स्थानं कोष्ठात् चित्वा लिखत। (कोई 6 करें)

(क) म .............................. (ओष्ठ / तालु)

(ख) च .............................. (मूर्धा / तालु)

(ग) क .............................. (कण्ठ / दन्त)

(घ) उ .............................. (ओष्ठ / कण्ठ)

(ङ) ट .............................. (मूर्धा / दन्त)

(च) व .............................. (दन्तोष्ठ / कण्ठोष्ठ)

(छ) अ .............................. (कण्ठ / तालु)

(ज) ह .............................. (कण्ठ / मूर्धा) 3

8. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययोः संयोगेन निर्मितानां शब्दानां प्रयोगेण रिक्तस्थानानि पूरयत। (कोई 5 करें)

(क) सः ............ गच्छति। (हस् + शतृ)

(ख) बालेन पाठः .............। (पठ् + क्त)

(ग) श्यामः गृहं ............. । (गम् + क्तवतु)

(घ) मोहनः किं .............. इच्छति। (कृ + तुमुन्)

(ङ) अहं फलं ........... विद्यालयम् गच्छति। (खाद् + क्त्वा)

(च) ............ नृत्यति। (बालक + टाप्)

(छ) दीपावली .......... उत्सवः अस्ति। (धर्म + ठक्)

(ज) सः .............. इच्छति। (पठ + तुमुन) 5

9. कोष्ठकेषु प्रदत्तशब्देषु विभक्तिं योजयित्वा निम्नलिखितानि रिक्तस्थानानि पूरयत। (कोई 5 करें)

(क) ............ नमः। (शिव + चतुर्थी)



Downloaded from cclchapter.com

(ख) राधा ............ सह गच्छति। (मोहन + तृतीया)

(ग) रामः ............ पतति। (वृक्ष + पञ्चमी)

(घ) जनः ............ पश्यति। (नेत्र + तृतीया)

(ङ) मोहनः ............ भ्राता अस्ति। (राम + षष्ठी)

(च) यूयं ............ पठथ। (विद्यालय + सप्तमी)

(छ) माता ............ अपश्यत। (पुत्र + द्वितीया)

(ज) ............... चलति। (मोहन + प्रथमा) 5

10. कोष्ठकेषु प्रदत्तधातुषु सुमुचितं पुरुषं वचन च प्रयुज्य रिक्तस्थानानि पूरयत। (कोई 5 करें)

(क) ते सर्वे ............। (गम् + लट्)

(ख) बालकाः भोजनं ..........। (खाद् + लङ्ग)

(ग) अद्यत्वं गृहं ............ । (गम् + लृट्)

(घ) वृक्षेभ्यः फलानि..........। (पत् + लृट्)

(ङ) अहं सर्वेषां कल्याणम्..........। (कृ + लृट्)

(च) छात्राः चित्रं.............। (दृश + लट्)

(छ) बालिकाः .............. । (धाव् + लट्)

(ज) सः दुग्धं.............। (पा + लट्) 5

**खण्ड - घ ( पठित-अवबोधनम् )**

11. अधोलिखित गद्यांशेषु कस्यचित् एकस्य गद्यांशस्य हिन्दी भाषायां अनुवादः विधीयताम्।

(क) पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याश्चैका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान्निक्षिप्य पुत्रीमादिदेश- सूर्यातपे तण्डुलान् खगेभ्यो रक्ष। किञ्चिद कालादनन्तरम् एको विचित्रः काकः समुड्डीय तामुपाजगाम्। नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः।



Downloaded from cclchapter.com

(ख) भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुं निर्जगाम। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतस्ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरभाणा वभूवुः। तन्द्रालुर्बालो लज्जया तेषां दृष्टिपथमपि परिहरन्नेकाकी किमप्युद्यानं प्रविवेश। 5

12. अधोलिखितयोः पद्यांशेयोः कस्यचित् एकस्य पद्यांशस्य सान्वय हिन्दी भाषायां अनुवादः क्रियताम्।

(क) प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।।

(ख) निनादय नवीनामये वाणि! वीणाम्, मृदुं गाय गीतिं ललित-नीति-लीनाम्।
मधुर-मञ्जरी-पिञ्जरी-भूत-मालाः, वसन्ते लसन्तीह सरसा रसालाः,
कलापाः ललित-कोकिला-काकलीनाम्।। निनादय.........।। 5

13. अधोलिखित गद्याशं पठित्वा तदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।

तस्य च गृहे लौहघटिता पूर्व पुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच - "भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला।" स आह - "भोः। नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति।

(1) एक पदेन उत्तरत-

(क) लौहघटिता का आसीत्?

(ख) तुला कैः भक्षिता?

(2) पूर्णवाक्येन उत्तरत-

(क) वणिक्पुत्रस्य गृहे कीदृशी तुला आसीत्?



Downloaded from cclchapter.com

(3) निर्देशानुसारम् उत्तरत–

(क) 'लौहनिर्मिता' इत्यस्य अत्र कः पर्यायः?

(ख) 'मूषकैर्भक्षिता' अत्र सन्धिच्छेदं कुरुत? 5

14. अधोलिखितं पद्यांश पठित्वा तदधारित प्रश्नानां उत्तराणि दीयन्ताम्।

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः।।

(1) एकपदेन उत्तरत–

(क) नद्यः स्वयमेव किं न पिबन्ति?

(ख) वृक्षाः कानि न खादन्ति?

(2) पूर्ण वाक्येन उत्तरत–

(क) केषां विभूतयः परोपकाराय भवन्ति?

(3) निर्देशानुसारम उत्तरत–

(क) 'परोपकाराय' इत्यत्र का विभक्ति?

(ख) 'पिबन्ति' इत्यत्र लकारस्य किम् नाम? 5

15. स्थूलपदान्यधिकृत्य पञ्च प्रश्नानांनिर्माणं कुरुत........(कोई 5)

(क) ग्रामे **निर्धना** स्त्री अवसत्।

(ख) बालिका **निर्धनमातुः** दुहिता आसीत्।

(ग) त्वं **सद्कटात्** माम उद्धृतवती।

(घ) **वृक्षाः** फलं न खादन्ति।

(ङ) **जीर्णधनः** विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।

(च) तपोदत्तः **तपश्चर्पया** विद्यामवाप्तुं प्रवृत्तोऽस्ति।

(छ) **तस्याः** अपि एका पुत्री आसीत्।

(ज) **स्वर्णकाकं** निवारयन्ती बालिका प्रार्थयत्। 5



Downloaded from cclchapter.com

16. यथानिर्दिष्ट कुरुत– 2×5=10

(क) अधोलिखित विग्रहपदानां समस्तपदानि लिखत–

(1) अक्षराणां ज्ञानम्

(2) सिकताया: सेतु:

(3) पितु: चरणै:

(4) गुरो: गृहम्

(5) विद्याया: अभ्यास: 2

(ख) पर्यायपदानि योजयत–

| | |
|---|---|
| (1) सरस्वती | तीरे |
| (2) आम्रम | अलीनाम् |
| (3) पवन: | समीर: |
| (4) तटे | वाणी |
| (5) भ्रमराणाम् | रसाल: 2 |

(ग) विशेषणै: सह विशेष्याणि योजयत–

| | |
|---|---|
| (1) कुलक्रमागत: | परोपकार: |
| (2) दानवीर: | मन्त्रिभि: |
| (3) हितैषिभि: | जीमूतवाहन: |
| (4) वीचिवच्चञ्चलम् | कल्पतरु: |
| (5) अनश्वर: | धनम् 2 |

(घ) उपसर्गान् पृथक्कृत्वा लिखत–

(1) प्रभवति

(2) उपलभ्यते

(3) समुपहरन्ति

(4) वितरन्ति



Downloaded from cclchapter.com

(5) उपगता 2

(ङ) विलोम पदानि योजयत–

| | |
|---|---|
| (1) दुर्बुद्धिः | असत्यम् |
| (2) गर्हितः | अनभ्यासः |
| (3) प्रवृतः | निवृत्तः |
| (4) अभ्यासः | प्रशंसितः |
| (5) सत्यम् | सुबुद्धिः |

2

कक्षा–9 के लिये सत्र 2020–2021 के लिये परिवर्तित प्रश्न–पत्र में परिवर्तित प्रश्नों का प्रारूप 7

1. विशेष – कोविन–19 के कारण कक्षा नवम् के लिये संस्कृत की पाठ्य–पुस्तक शेमुषी – प्रथमो भागः से सत्र 2020–2021 के लिये
   पाठ 7 प्रत्यभिज्ञानम्
   पाठ – 10 जटायोः शौर्यम्
   पाठ – 12 वाङ्मनः प्राणस्वरूपम्
   ये तीन पाठ हटा दिये गये हैं। अर्थात् परीक्षा में इनसे कोई प्रश्न नहीं पूछा जायेगा।
2. विशेष–कोविड–19 के कारण प्रश्न पत्र में 30 प्रतिशत अधिक विकल्प (Option) देने के लिये कहा गया है। अतः निम्नलिखित खण्ड और प्रश्न संख्या में कितने विकल्प होंगे का विवरण इस प्रकार है–
   खण्ड – ग (अनुप्रयुक्त व्याकरण) के
   प्रश्न 6 में 8 (आठ) विकल्प होंगे / जिनसे कोई छः करने होंगे।
   प्रश्न 7 में 8 (आठ) विकल्प होंगे / जिनसे कोई छः करने होंगे।
   प्रश्न 8 में 8 (आठ) विकल्प होंगे / जिनसे कोई पांच करने होंगे।
   प्रश्न 9 में 8 (आठ) विकल्प होंगे / जिनसे कोई पांच करने होंगे।



Downloaded from cclchapter.com

प्रश्न 10 में 8 (आठ) विकल्प होंगे / जिनसे कोई पांच करने होंगे।

**खण्ड-घ ( पठित-अवबोधनम् ) के**

प्रश्न 15 में 8 (आठ) विकल्प होंगे / जिनसे कोई पांच करने होंगे।

शेष सभी प्रश्नों का प्रारूप पूर्व-सत्र के प्रश्न-पत्र की तरह ही होगा।

विशेष-कक्षा नवम् प्रश्न-पत्र का अंक विभाजन पिछले सत्र की भान्ति ही है। प्रश्नों के अंक विभाजन में कोई परिवर्तन नहीं किया गया है।



Downloaded from cclchapter.com

| क्रम. स. | पाठ संख्या | हटाये गये अध्याय / पाठ का नाम | पृष्ठ सं. |
|---|---|---|---|
| | | कक्षा-9वीं<br>पुस्तक का नाम : शेमुशी भाग-1 | |
| 1. | अध्याय 7 | प्रत्यभिज्ञान | 45 से 55 तक |
| 2. | अध्याय 10 | जटायोः शैर्यम्। | 71 से 77 तक |
| 3. | अध्याय 12 | वाङ्मनः प्राणस्वरूपम्।<br>कक्षा - दसवीं<br>पुस्तक का नामः शेमुशी भाग-2 | 85 से 90 तक |
| 1. | अध्याय 10 | भूकम्पविभीषिका। | 82 से 89 तक |
| 2. | अध्याय 11 | प्राणेभ्योऽपि प्रियः सुहृद। | 90 से 98 तक |
| 3. | अध्याय 12 | अन्योत्त्क्यः। | 99 से 106 तक |

विशेष-कक्षा नवीं के प्रश्न-पत्र का अंक विभाजन पिछले सत्र की भान्ति ही है। प्रश्नों के अंक विभाजन में कोई परिवर्तन नहीं किया गया है।



Downloaded from cclchapter.com